ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय

# अभिश्रवणमन्त्र पाठः

## Version Notes:

**This is now the current Version 3.2 dated Sep 30, 2022.**

1. This replaces the earlier version 3.1 dated May 31, 2021.
2. This version has been updated with the errors found and reported till Sep 30, 2022.
3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.
4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 1.0 dated 10th March 2017 |
| 2nd | Version Number | 2.0 dated 10th Jan 2018 |
| 3rd | Version Number | 3.0 dated 18th April 2018 |
| 4th | Version Number | 3.1 dated 31st May 2021 |

## SHORT NOTE ON "ABHISRAVANAM"

Abhisravanam means dignified hearing. Abhisravana Mantra should be chanted during ceremony to forefathers like Sraadham etc. This should be chanted loudly while the Brahmins are partaking food so that these mantras are to be heared by Brahmins, who represent "Pitrus"of Sraadham ceremony. Since these Mantras are about "Pitrus", when chanted they are pleased and depart contented after Sraadham ceremony. These Mantras will also keep the "Raakshasaas"(evil forces)/ other hindrances at bay.

Brahmins will be invited to perform Abhisravanam. They should be offered dakshina after the Sraadham for chanting Abhisravanam.

For Ekodishtam (the eleventh day of death ceremony), Sapindeekaranam (the 12th day ceremony), Maasikam, Anumaasikam, Naandi, Gaya Sraadham, 1stSraadham of the deceased(1st Death Anniversery) etc., Abhisravanam Mantra shall not to be chanted.

The Abishravana Mantras are the part of "Taittiriya Shaka" and the Mantras are from "SAMHITA" and "BRAHMANA"

**General Notes:**

**This Book has been brought to you with the courtesy of some Veda learners who have collaborated to prepare this book.**

**Please give your feedback, comments and report errors to the e-mail id vedavms@gmail.com. We shall strive to make this book more accurate and error-free.**

**You may note that there are inherent "paata bedhas" when we compare various sources and books, the Taittiriya Sakhaa compiled and commented by Shri. Sayanacharya of 13th Century and Shri Bhatta Bhaskaracharya (period unknown). Their manuscript compilations were later converted into books by great Scholars. One of such sets of "Taittiriya" was printed and published during earlier 1900 A.D. at Govt. Branch Press, Mysore and another set later published under "Anandaashram Series". These Books were referred to by us as our primary source material for this Book.**

**We have also referred "Yaajusha Ratnaakaram" in Sanskrit and "Abisravana Mantra Pataha" in grantha Script published in 1923 by Shri T.M. Narayana Shastri .**

**This book has not been prepared with any commercial purpose and is purely for studies.**

**Conventions used in Letters:**

**ꣳ is represented by (gg)**

**ꣴ is represented by (gm)**

**ँ is represented as anunaasikam**

**"[ ]" is represented as the end of a "panchaati", not a full-stop nor a sentence break. Hence donot stop the chant on the mark of "[ ]" and continue till a sentence break (full stop) comes.**

# Table of Contents

1 पुरुष सूक्तं........8

2 उत्तर नारायणं........11

3 महा नारायणं........12

4 ऋतꣳ सत्यं........14

5 रक्षोघ्नं........16

6 रक्षोहणो वलगहनः........20

7 सोमाय पितृमते........20

8 उशन्तस्त्वा हवामह उशन्तः........22

9 भक्षेहि माऽऽविश........25

10 ध्रुवाऽसि धरुणाऽस्तृता........25

11 अग्न उदधे या त इषुः........33

12 शिरो वा एतद् यज्ञस्य........35

13 असावादित्यो ऽस्मिन् ँल्लोक........35

14 संततिर्वा एते ग्रहाः........37

15 एकविꣳश एष भवति........41

16 इन्द्रो वृत्रꣳ हत्वा........41

17 वैश्वदेवेन वै प्रजापतिः........43

18 अग्नये देवेभ्यः....................47
19 उशन्तस्त्वा हवामह....................55
20 अयं वाव यः....................57
21 उशन् ह वै....................59
22 तᳫ् हैतमेके....................63
23 यां प्रथमामिष्टका....................67
24 ऋचां प्राची....................69

================================

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

## अभिश्रवणमन्त्र पाठः

## वेदादयः

ओं । अग्निमीळे पुरोहितं-यज्ञस्य देवमृत्विजं ।
होतारं रत्न धातमं ।

इषेत्वोर्जेत्वा वायवस्स्थो पायवस्स्थ देवो वस्सविता प्रार्पयतु
श्रेष्ठतमाय कर्मणे ।

अग्न आयाहि वीतये गृणानो हव्यदातये ।
निहोता सत्सि बर्हिषि ।

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शंयोरभि स्रवन्तुनः ॥ 1

# 1 पुरुष सूक्तं

**T.A. 3.12.1**

सहस्रशीर्.षा पुरुषः । सहस्राक्षः सहस्रपात् ।

स भूमिं ँविश्वतो वृत्वा । अत्यतिष्ठ–द्दशाङ्गुलं ।

पुरुष एवेद॑ꣳ सर्वं । यद् भूतं ँयच्च भव्यं ।

उतामृतत्व–स्येशानः । यदन्नेनाति–रोहति ।

एतावानस्य महिमा । अतो ज्यायाꣳश्च पूरुषः ॥ 1

**T.A. 3.12.2**

पादोऽस्य विश्वा भूतानि । त्रिपादस्या–मृतन्दिवि ।

त्रिपादूर्द्ध्व उदैत् पुरुषः । पादोऽस्येहा ऽऽभवात्पुनः ।

ततो विष्वङ् व्यक्रामत् । साशनानशने अभि ।

तस्माद् विराड जायत । विराजो अधि पूरुषः ।

स जातो अत्यरिच्यत । पश्चाद् भूमिमथो पुरः ॥ 2

**T.A. 3.12.3**

यत् पुरुषेण हविषा । देवा यज्ञमतन्वत ।

वसन्तो अस्या–सीदाज्यं । ग्रीष्म इद्ध्म–श्शरद्धविः ।

सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः ।

देवा यद् यज्ञं–तन्वानाः । अबद्ध्नन् पुरुषं पशुं ।

तं ँयज्ञं बर्.हिषि प्रौक्षन्न् । पुरुषं जातमग्रतः ॥ 3

**T.A. 3.12.4**

तेन देवा अयजन्त । साद्ध्या ऋषयश्च ये ।

तस्माद्यज्ञाथ् सर्वहुतः । संभृतं पृषदाज्यं ।

पशूꣳस्ताꣳश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ।

तस्माद्यज्ञाथ् सर्वहुतः । ऋचः सामानि जज्ञिरे ।

छन्दाꣳसि जज्ञिरे तस्मात् । यजुस्तस्मा दजायत ॥ 4

**T.A. 3.12.5**

तस्मादश्वा अजायन्त । ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ।

यत्पुरुषं ँव्यदधुः । कतिधा व्यकल्पयन्न् ।

मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।

ब्राह्मणोस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ 5

**T.A. 3.12.6**

ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायतः ।

चन्द्रमा मनसो जातः । चक्षो–स्सूर्यो अजायत ।

मुखादिन्द्र–श्चाग्निश्च । प्राणाद् वायु–रजायत ।

नाभ्या आसीदन्तरिक्षं । शीर्ष्णो द्यौः समवर्त्तत ।

पद्भ्यां भूमि र्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन्न् ॥ 6

**T.A. 3.12.7**

वेदाहमेतं पुरुषं महान्तं । आदित्यवर्णं तमसस्तु पारे ।

सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन्. यदास्ते ।

धाता पुरस्ताद्यमुदा जहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।

तमेवं ँविद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ।

यज्ञेन यज्ञ–मयजन्त देवाः । तानि धर्माणि प्रथमान्यासन्न् ( ) ।

ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साद्ध्या–स्सन्ति देवाः ॥ 7

**(पूरुषः – पुरो – ऽग्रतो – ऽजायत – कृतो – ऽकल्पय –**

**न्नासन् द्वे च)**

## 2 उत्तर नारायणं

**T.A. 3.13.1**

अद्भ्यस्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्त्तताधि ।

तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्व माजानमग्रे ॥

वेदाहमेतं पुरुषं महान्तं । आदित्य वर्णं तमसः परस्तात् ।

तमेवं ँविद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय ॥

प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते । 8

**T.A. 3.13.2**

तस्य धीराः परिजानन्ति योनिं । मरीचीनां पदमिच्छन्ति वेधसः ॥

यो देवेभ्य आतपति । यो देवानां पुरोहितः ।

पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ॥

रुचं ब्राह्मञ्जनयन्तः । देवा अग्रे तदब्रुवन्न् ।

यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे ( ) ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ।

नक्षत्राणि रूपं । अश्विनौ व्यात्तं ।

इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ 9

**(जायते – वश सप्त च)**

## 3 महा नारायणं

**TA 6.11.1**

सहस्रशीर्.षं देवं ँविश्वाक्षं ँविश्वशं भुवं ।

विश्वं नारायणं देवमक्षरं परमं पदं ॥

विश्वतः परमान्नित्यं ँविश्वं नारायण॑ हरिं ।

विश्वमेवेदं पुरुष स्तद्विश्व–मुपजीवति ॥

पतिं ँविश्वस्यात्मेश्वर॑ शाश्वत॑ शिवमच्युतं ।

नारायणं महाज्ञेयं ँविश्वात्मानं परायणं ॥

नारायण परो ज्योतिरात्मा नारयणः परः ॥

नारायण परं ब्रह्म तत्त्वं नारायणः परः ।

नारायण परो ध्याता ध्यानं नारायणः परः ।

यच्च किञ्चिज्–जगथ्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर् बहिश्च तथ् सर्वं ँव्याप्य नारायणः स्थितः ॥ 10

**TA 6.11.2**

अनन्त मव्ययं कवि॑ँ समुद्रेऽन्तं ँविश्वशंभुवं ।
पद्मकोश–प्रतीकाश॑ँ हृदयं चाप्यधोमुखं ॥
अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
ज्वालमालाकुलं भाती विश्वस्यायतनं महत् ॥
सन्तत॑ँ शिलाभिस्तु लंबत्या कोशसन्निभं ।
तस्यान्ते सुषिर॑ँ सूक्ष्मं तस्मिन्थ् सर्वं प्रतिष्ठितं ॥
तस्य मध्ये महानग्निर् विश्वार्चिर् विश्वतो मुखः ।
सोऽग्रभुग् विभजन् तिष्ठन्नाहार–मजरः कविः ॥
तिर्यगूर्द्ध्व मधश्शायी रश्मयस्तस्य सन्तता ।
सन्तापयति स्वं देहमापादतल मस्तगः ।
तस्य मध्ये वह्नि शिखा अणीयोर्द्ध्वा व्यवस्थितः ( ) ॥

नीलतो यद मध्यस्थाद् विद्युल्लेखेव भास्वरा ।

नीवार शूकवत्तन्वी पीता भास्वत्यणूपमा ॥

तस्याः शिखाया मद्ध्ये परमात्मा व्यवस्थितः ।

स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ **11**

**(नारायणः स्थितो – व्यवस्थितश्चत्वारि च)**

## 4 ऋतꣳ सत्यं

**T.A.6.12.1**

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्ण पिङ्गलं ।

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ **12a**

**T.A.6.1.6**

नारायणाय विद्महे वासुदेवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात् ॥ **12b**

**T.S.1.2.23**

वि॒ष्णो॒र्नुकं॑ ँवी॒र्या॑णि॒ प्रवो॑चं॒ ँयः पार्थि॑वानि विम॒मे रजा॑ꣳसि॒

यो अस्क॑भाय॒-दुत्त॑रꣳ स॒धस्थं॑ ँविचक्रमा॒ण-स्त्रे॒धोरु॑गा॒यो

विष्णो॑-र॒राट॑मसि॒ विष्णोः᳚ पृ॒ष्ठम॑सि॒ विष्णो॒-श्ञप्त्रे᳚स्थो॒ विष्णो॒

-स्स्यूर॑सि॒ विष्णो᳚र् ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा ॥ **12c**

============

## 5 रक्षोघ्नं

कृणुष्व पाजः प्रसितिं न पृथ्वीं यॉहि राजे वामवा॑ इभे न ।
तृष्वीमनु प्रसितिं–दूणानो ऽस्ता ऽसि विद्ध्य रक्षस स्तपिष्ठैः ॥
तव भ्रमास आशुया पतंत्यनु स्पृश धृषता शोशुचानः ।
तपू॑ष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विष्व गुल्काः ॥
प्रतिस्पशो विसृज–तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघश॑सो – [ ] 13

**TS 1.2.14.2**

यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्.षीत् ॥
उदग्ने तिष्ठ प्रत्याऽऽ तनुष्व न्यमित्रा॑ ओषतात् तिग्महेते ।
यो नो अराति॑ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं ॥
ऊर्द्ध्वो भव प्रति विद्ध्याद्ध्यस्मदा विष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातु जूनां जामिमजामिं प्र मृणीहि शत्रून् ॥
स ते – [ ] 14

**TS 1.2.14.3**

जानाति सु॒मतिं ँय॑वि॒ष्ठय ईव॑ते॒ ब्रह्म॑णे गा॒तुमै॑रत् ।

विश्वा᳚न्यस्मै सु॒दिना॑नि रा॒यो द्यु॒म्नान्य॒र्यो वि दुरो॑ अ॒भि द्यौ᳚त् ॥

से॑दग्ने अस्तु सु॒भग॑ः सु॒दानु॒र्यस्त्वा॒ नित्ये॑न ह॒विषा॒य उ॒क्थैः ।

पिप्री॑षति॒ स्व आयु॑षि दुरो॒णे विश्वे॑दस्मै सु॒दिना॒ सा ऽस॑दि॒ष्टिः ॥

अर्चा॑मि ते सु॒मतिं घोष्य॒र्वाख् सं ते॑ वा॒वाता॑ जरता – [ ] **15**

**TS 1.2.14.4**

मि॒यंगीः ।

स्वश्वा᳚स्त्वा सु॒रथा॑ मर्जये–मा॒स्मे क्ष॒त्राणि॑ धारये॒रनु॒ द्यून् ॥

इ॒ह त्वा॒ भूर्या च॑रे॒दुप॒ त्मन् दो॑षावस्त दीदि॒वाꣳस॒–मनु॒ द्यून् ।

क्री॑डन्तस्त्वा सु॒मन॑सः सपेमा॒भि द्यु॒म्ना त॑स्थि॒वाꣳसो॒ जना॑नां ॥

यस्त्वा॒ स्वश्वः॑ सुहि॒रण्यो अ॑ग्न उ॒पया॑ति॒ वसु॑मता॒ रथे॑न ।

तस्य॑ त्रा॒ता भ॑वसि॒ तस्य॒ सखा॒ यस्त॑ आति॒थ्यमा॑नु॒षग् जुजो॑षत् ॥

म॒हो रु॑जामि – [ ] **16**

**TS 1.2.14.5**

बन्धुता वचोभिस्तन्मा पितुर्गोतमाद–न्वियाय ।

त्वं नो अस्य वचस–श्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥

अस्वप्नजस्तरणयः सुशेवा अतन्द्रा सो ऽवृका अश्रमिष्ठाः ।

ते पायवः सद्ध्रियञ्चो निषद्या ऽग्ने तव नः पान्त्वमूर ॥

ये पायवो मामतेयंते अग्ने पश्यन्तो अन्धं दुरिताद रक्षन्न् ।

ररक्षतान्थ् सुकृतो विश्ववेदा दिफ्सन्त इद्–रिपवो ना ह – [ ] 17

**TS 1.2.14.6**

देभुः ॥

त्वया वयꣳ सधन्य–स्त्वोता–स्तव प्रणीत्य श्याम वाजान् ।

उभा शꣳसा सूदय सत्यताते ऽनुष्ठुया कृणुह्यह्रयाण ॥

अया ते अग्ने समिधा विधेम प्रति स्तोमꣳ शस्यमानं गृभाय ।

दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात् ॥

रक्षोहणं वाँजिनमाजि घर्मि मित्रं प्रथिष्ठ–मुप यामि शर्म ।

शिशानो अग्निः क्रतुभिः–समिद्धः–सनो दिवा – [ ] 18

**TS 1.2.14.7**

स रिषः पातुनक्तं ॥

विज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुतेमहित्वा ।

प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥

उत स्वानासो दिवि षन्त्वग्ने स्तिग्मायुधा रक्षसे हन्त वा उ ।

मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ 19

**(अघशꣳसः-स ते-जरताꣳ-रुजामि-ह - दिवै-कचत्वारिꣳशच्च)***(A14)*

============

# अभिश्रवणमन्त्र जपारंभः

## 6 रक्षोहणो वलगहनः

**TS 1.3.2.2**

रक्षोहणो वलगहनो वैष्णवान् खनामीदमहं तं ँवलगमुद्-वपामि यं नः समानो यमसमानो निचखानेदमेनमधरं करोमि यो नः समानो यो ऽसमानो ऽरातीयति गायत्रेण छन्दसा ऽवबाढो वलगः किमत्र भद्रं तन्नौ सह विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासां नाष्ट्राणा७ं हन्ता –[ ] 20

**TS 1.3.2.2**

रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वलगहनो ऽव नयामि वैष्णवान्. यवो ऽसि यवयास्मद् द्वेषो यवयाराती रक्षोहणो वलगहनो ऽव स्तृणामि वैष्णवान् रक्षोहणो वलगहनो ऽभि जुहोमि वैष्णवान् रक्षोहणौ वलगहनावुप दधामि वैष्णवी रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी रक्षोहणौ वलगहनौ परि स्तृणामि वैष्णवी रक्षोहणौ वलगहनौ वैष्णवी बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय ( ) वाचं ँवद ॥ 21 **(हन्ते-न्द्राय द्वे च)** *(A2)*

# 7 सोमाय पितृमते

**TS 1.8.5.1**

सोमाय पितृमते पुरोडाशꣳ षट्कपालं निर्वपति पितृभ्यो

बर्.हिषद्भ्यो धानाः पितृभ्यो ऽग्निष्वात्तेभ्यो ऽभिवान्यायै दुग्धे

मन्थमेतत् ते तत ये च त्वा–मन्वेतत् ते पितामह प्रपितामह ये च

त्वामन्वत्र पितरो यथाभागं मन्दद्ध्वꣳसुसन्दृशं त्वा वयं मघवन्

मन्दिषीमहि ।

प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशाꣳ अनु ।

योजा न्विन्द्र ते हरी ॥ **22**

**TS 1.8.5.2**

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।

अस्तोषत स्वभानवो विप्रा नविष्ठया मती ।

योजा न्विन्द्र ते हरी ॥

अक्षन् पितरो ऽमीमदन्त पितरो ऽतीतृपन्त पितरो ऽमीमृजन्त पितरः ॥

परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः ।

अथा पितृन्थ् सुविदत्राꣳ अपीत यमेन ये सधमादं मदन्ति ॥

मनो न्वा हुवामहे नाराशꣳसेन स्तोमेन पितॄणां च मन्मभिः ॥

आ – [ ] **23**

**TS 1.8.5.3**

न एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।

ज्योक् च सूर्यं दृशे ॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः ।

जीवं व्रातꣳ सचेमहि ॥

यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिꣳसिम ।

अग्निर्मा तस्मादेनसो गार्.हपत्यः प्र मुञ्चतु दुरिता यानि चकृम

करोतु मा–मनेनसं ॥ **24**

*(हरी–मन्मभिरा–चतुश्चत्वारिꣳशच्च) (A5)*

## 8 उशन्तस्त्वा हवामह उशन्तः

उशन्तस्त्वा हवामह उशन्तः समिधीमहि ।

उशन्नुशत आ वह पितॄन्. हविषे अत्तवे ॥

त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थां ।

तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।

वन्वन्नवातः परिधीꣳ रपोर्णु वीरेभिरश्वैर्मघवा भवा – [ ] **25**

**TS 2.6.12.2**

नः ॥

त्वꣳ सोम पितृभिः सँविदानोऽनु द्यावापृथिवी आ ततन्थ ।

तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणां ॥

अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।

अत्ता हवीꣳषि प्रयतानि बर्.हिष्यथा रयिꣳ सर्ववीरं दधातन ॥

बर्.हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषद्ध्वं ।

त आ गताऽऽवसा शन्तमेनाथास्मभ्यꣳ – [ ] **26**

**TS 2.6.12.3**

शं ँयो–ररपो दधात ॥

आऽहं पितृन्थ् सुविदत्राꣳ अविथ्सि नपातं च विक्रमणं च विष्णोः ।

बर्.हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहाऽऽ गमिष्ठाः ॥

उपहूताः पितरः सोम्यासो बर्.हिष्येषु निधिषु प्रियेषु ।

त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान् ॥

उदीरता-मवर उत् परास उन्मद्ध्यमाः पितरः सोम्यासः ।

असुं - [ ] **27**

**TS 2.6.12.4**

यँ ईयु-रवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।

ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।

शुचीदयन् दीधिति-मुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन्न् ॥

यदग्ने - [ ] **28**

**TS 2.6.12.5**

कव्यवाहन पितॄन्. यक्ष्यृतावृधः ।

प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ ॥

त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा ।

प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि ॥

मातली कव्यैर्यमो अङ्गिरोभि र्बृहस्पतिर्. ऋक्वभि र्वावृधानः ।

या७श्च देवा वावृधुर्ये च देवान्थ् स्वाहाऽन्ये स्वधयाऽन्ये मदन्ति ॥ **29**

**TS 2.6.12.6**

इमं ँयम प्रस्तर–मा हि सीदाऽङ्गिरोभिः पितृभिः सँविदानः ।

आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्. हविषा मादयस्व ॥

अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपै–रिह मादयस्व ।

विवस्वन्त७ हुवे यः पिता तेऽस्मिन्. यज्ञे बर्.हिष्या निषद्य ॥

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।

तेषां ँवय७ सुमतौ यज्ञियानामपि भद्रे सौमनसे ( ) स्याम ॥ **30**

**(भवा – स्मभ्य – मसुं – ँयदग्ने – मदन्ति – सौमनस एकं च)**

## 9 भक्षेहि माऽऽविश

**TS 3.2.5.1**

भक्षेहि माऽऽ विश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय

वर्चसे सुप्रजास्त्वायेहि वसो पुरोवसो प्रियो मे हृदोऽस्यश्विनोस्त्वा

बाहुभ्या७ सघ्यासं नृचक्षसं त्वा देव सोम सुचक्षा अव ख्येषं

मन्द्रा ऽभिभूतिः केतुर्यज्ञानां ँवाग्जुषाणा सोमस्य तृप्यतु मन्द्रा

स्वर्वाच्यदितिरनाहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि

विश्वचर्.षणे – [ ] 31

**TS 3.2.5.2**

शम्भूर्मयोभूः स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दक्षाय रायस्पोषाय

सुवीरतायै मा मा राजन् वि बीभिषो मा मे हार्दि त्विषा वधीः ।

वृषणे शुष्मायाऽऽयुषे वर्चसे ॥

वसुमद्गणस्य सोम देव ते मतिविदः प्रातस्सवनस्य गायत्रछन्दस

इन्द्रपीतस्य नराश॒ꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो

भक्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माद्ध्यन्दिनस्य

सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य नराश॒ꣳसपीतस्य – [ ] 32

**TS 3.2.5.3**

पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयाम्यादित्यवद्गणस्य

सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य

नराश॒ꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियं ।

भवा वाजस्य सङ्गथे ॥

हिन्व मे गात्रा हरिवो गणान् मे मा वितीतृषः ।

शिवो मे सप्तर्.षीनुप तिष्ठस्व मा मेऽवाङ्नाभिमति – [ ] **33**

**TS 3.2.5.4**

गाः ॥

अपाम सोमममृता अभूमाऽदर्श्म ज्योतिरविदाम देवान् ।

किमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥

यन्म आत्मनो मिन्दा ऽभूदग्निस्तत् पुनरा ऽहार्जातवेदा विचर्.षणिः ॥

पुनरग्निश्चक्षुरदात्–पुनरिन्द्रो बृहस्पतिः ।

पुनर्मे अश्विना युवं चक्षुरा धत्तमक्ष्योः ॥

इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य – [ ] **34**

**TS 3.2.5.5**

शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो

भक्षयामि ॥ आपूर्याः स्थाऽऽ मा पूरयत प्रजया च धनेन च ॥

एतत् ते तत ये च त्वामन्वेतत् ते पितामह प्रपितामह ये च त्वामन्वत्र

पितरो यथाभागं मन्दद्ध्वं नमो वः पितरो रसाय नमो वः पितरः

शुष्माय नमो वः पितरो जीवाय नमो वः पितरः – [ ] **35**

**TS 3.2.5.6**

स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिन् ँल्लोकेस्थ युष्मा९ँस्तेऽनु येऽस्मिन् ँल्लोके मां तेऽनु य एतस्मिन् ँल्लोके स्थ यूयं तेषां ँवसिष्ठा भूयास्त येऽस्मिन् ँल्लोकेऽहं तेषां ँवसिष्ठो भूयासं प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । **36**

**TS 3.2.5.7**

यत् कामास्ते जुहुमस्तन्नो अस्तु वय९ँ स्याम पतयो रयीणां ॥

देवकृतस्यैनसो ऽवयजनमसि मनुष्यकृतस्यैनसो ऽवयजनमसि पितृकृतस्यैनसो ऽवयजनमस्यफ्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षोअश्वसनिर्यो गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो भक्षयामि ॥ **37**

*(विश्वचर्.षणे – त्रिष्टुप्छन्दस इन्द्रपीतस्य नराश९ँसपीतस्या – ऽति –स्तुतस्तोमस्य – जीवाय नमो वः पितरो – बभूव – चतुश्चत्वारि९ँशच्च) (A5)*

## 10 ध्रुवाऽसि धरुणाऽस्तृता

ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा सुकृता ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णो ऽव्यथमाना पृथिवीं दृꣳह ॥
प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे व्यचस्वतीं प्रथस्वतीं प्रथोऽसि
पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य
धर्त्री पृथिवीं यँच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीर्विश्वस्मै
प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै – [ ] **38**

**<u>TS 4.2.9.2</u>**

चरित्रायाग्निस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन
तया देवतयाऽङ्गिरस्वद्–ध्रुवा सीद ॥
काण्डात्काण्डात् प्ररोहन्ती परुषःपरुषः परि ।
एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ॥
या शतेन प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवीष्टके विधेम हविषा वयं ॥

अषाढाऽसि सहमाना सहस्वारातीः सहस्वारातीयतः सहस्व

पृतनाः सहस्व पृतन्यतः ।

सहस्रवीर्या – [ ] **39**

**TS 4.2.9.3**

–ऽसि सा मा जिन्व ॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।

माद्ध्वीर्नः सन्त्वोषधीः ॥

मधु नक्तमुतोषसि मधुमत् पार्थिवꣳ रजः ।

मधु द्यौरस्तु नः पिता ॥

मधुमान् नो वनस्पति–र्मधुमाꣳ अस्तु सूर्यः ।

माद्ध्वीर्गावो भवन्तु नः ॥

मही द्यौः पृथिवी च न इमं ँयज्ञं मिमिक्षतां ।

पिपृतां नो भरीमभिः ॥

तद्–विष्णोः परमं – [ ] **40**

**TS 4.2.9.4**

पद८ं सदा पश्यन्ति सूरयः ।

दिवीव चक्षुराततं ॥

ध्रुवाऽसि पृथिवि सहस्व पृतन्यतः ।

स्यूता देवेभिरमृतेनाऽऽ *गाः ॥

यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः ।

ताभिः सर्वाभी रुचे जनाय न स्कृधि ॥

या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।

इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥

विराड् – [ ] **41**

**TS 4.2.9.5**

ज्योतिरधारयथ् सम्राड् ज्योतिरधारयथ् स्वराड् ज्योतिरधारयत् ॥

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः ।

अरं ँवहन्त्याशवः ॥

युक्ष्वा हि देवहूतमा८ं अश्वा८ं अग्ने रथीरिव ।

नि होता पूर्व्यः सदः ॥

द्र॒प्सश्च॑स्कन्द पृथि॒वीम॑नु॒ द्यामि॒मं च॒ योनि॒मनु॒ यश्च॒ पूर्वः॑ ।
तृ॒ती॒यं॒ ँ॒योनि॒मनु॑ स॒ञ्चर॑न्तं द्र॒प्सं जु॑हो॒म्यनु॑ स॒प्त – [ ] 42

**TS 4.2.9.6**

हो॒त्राः ॥

अभू॑दि॒दं ँविश्व॑स्य॒ भुव॑नस्य॒ वाजि॑नम॒ग्नेर्–वै॑श्वान॒रस्य॑ च ।
अ॒ग्निर्ज्योति॑षा॒ ज्योति॑ष्मान् रु॒क्मो वर्च॑सा॒ वर्च॑स्वान् ॥
ऋ॒चे त्वा॑ रु॒चे त्वा॒ समिथ् स्र॑वन्ति स॒रितो॒ न धेनाः॑ ।
अ॒न्तर्. हृ॒दा मन॑सा पूय॒माना॑ः ॥
घृ॒तस्य॒ धारा॑ अ॒भि चा॑कशीमि ।
हि॒रण्ययो॑ वे॒तसो॒ मद्ध्य॑ आसां ॥
तस्मि॑न्थ्सुप॒र्णो म॑धु॒कृत् कु॑ला॒यी भज॑न्नास्ते॒ मधु॑ दे॒वता॑भ्यः ।
तस्या॑सते॒ हर॑यः स॒प्त तीरे॑ ( ) स्व॒धां दु॑हा॒ना अ॑मृतस्य॒ धारां॑ ॥ 43

*(प्र॒ति॒ष्ठायै॑ – स॒हस्र॑वीर्या – प॒रमं – ँवि॒राट्थ् – स॒प्त – तीरे॑ – च॒त्वारि॑ च) (A9)*

## 11 अग्न उदधे या त इषुः

**TS 5.5.9.1**

अग्न उदधे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नम स्तस्या
स्त उप जीवन्तो भूयास्माग्ने दुद्ध्र गह्य किंशिल वन्य या त
इषुर्युवा नाम तया नो मृड तस्यास्ते नम स्तस्या स्त उप जीवन्तो
भूयास्म पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो
दुद्ध्रो– [ ] **44**

**TS 5.5.9.2**

द्वितीयो गह्यस्तृतीयः किंशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो
यदाहुतीर्न जुहुयादद्ध्वर्युं च यजमानं च प्र दहेयुर्यदेता
आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्च्छत्यद्ध्वर्युर्न
यजमानो वाङ् म आसन् नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं
बाहुवोर्बल–मूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनू – [ ] **45**

**TS 5.5.9.3**

–स्तनुवा मे सह नमस्ते अस्तु मा मा हिंसीरप वा एतस्मात्
प्राणाः क्रामन्ति यो ऽग्निं चिन्व–न्नधिक्रामति वाङ् म आसन् नसोः
प्राण इत्याह प्राणानेवाऽऽत्मन् धत्ते यो रुद्रो अग्नौ यो अप्सु

य ओषधीषु यो रुद्रो विश्वा भुवना ऽऽविवेश तस्मै रुद्राय नमो
अस्त्वाहुतिभागा वा अन्ये रुद्रा हविर्भागा – [ ] **46**

**TS 5.5.9.4**

अन्ये शतरुद्रीय८ं हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां
नि दद्ध्याद्–भागधेयेनैवैन८ं शमयति तस्य त्वै शतरुद्रीय८ं
हुतमित्याहुर्यस्यैतदग्नौ क्रियत इति वसवस्त्वा रुद्रैः पुरस्तात् पान्तु
पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्वादित्यास्त्वा विश्वैर्देवैः
पश्चात् पान्तु द्युतान स्त्वा मारुतो मरुद्भि–रुत्तरतः पातु – [ ] **47**

**TS 5.5.9.5**

देवास्त्वेन्द्रज्येष्ठा वरुणराजानो ऽधस्ताच्चो–परिष्ठाच्च पान्तु
न वा एतेन पूतो न मेद्ध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति
यथ् सञ्चितमाज्येन प्रोक्षति तेन पूतस्तेन मेद्ध्यस्तेन प्रोक्षितः ॥ **48**

*(दुध्र – स्तनूरः – हविर्भागाः – पातु – द्वात्रि८ंशच्च) (A9)*

## 12 शिरो वा एतद् यज्ञस्य

शिरो वा एतद्-यज्ञस्य यद्धविर्द्धानं प्राणा उपरवा हविर्द्धाने
खायन्ते तस्माच्छीर्.षन् प्राणा अधस्तात् खायन्ते
तस्मादधस्ताच्छीर्ष्णः प्राणा रक्षोहणो वलगहनो वैष्णवान्
खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्यन्तो देवानां
प्राणेषु वलगान् न्यखनन् तान् बाहुमात्रे ऽन्वविन्दन् तस्माद् बाहुमात्राः
खायन्त इदमहं तं वँलगमुद्-वपामि- [ ] **49**

**TS 6.2.11.2**

यं नः समानो य-मसमानो निचखानेत्याह द्वौ वाव पुरुषौ
यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्तमेवोद्-
वपति सं तृणत्ति तस्माथ् सन्तृण्णा अन्तरतः प्राणा न सं भिनत्ति
तस्मादसंभिन्नाः प्राणा अपो ऽव नयति तस्मादार्द्रा अन्तरतः प्राणा
यवमतीरव नय- [ ] **50**

**TS 6.2.11.3**

-त्यूर्ग्वै यवः प्राणा उपरवाः प्राणेष्वेवोर्जं दधाति बर्.हिरव स्तृणाति
तस्माल्लोमशा अन्तरतः प्राणा आज्येन व्याघारयति तेजो वा आज्यं

प्राणा उपरवाः प्राणेष्वेव तेजो दधाति हनू वा एते यज्ञस्य यदधिषवणे न सं तृणत्त्यसन्तृण्णे हि हनू अथो खलु दीर्घसोमे संतृद्ये धृत्यै शिरो वा एतद्–यज्ञस्य यद्धविर्द्धानं– [ ] 51

**TS 6.2.11.4**

प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ता मुखमाहवनीयो नासिको–त्तरवेदि–रुदरꣳ सदो यदा खलु वै जिह्वया दथ्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं गच्छति तस्माद्धविर्द्धाने चर्मन्नधि ग्रावभि–रभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं वेद दुह एवै ( ) नामियं वै विराट् तस्यै त्वक् चर्मोधो ऽधिषवणे स्तना उपरवा ग्रावाणो वथ्सा ऋत्विजो दुहन्ति सोमः पयो य एवं वेद दुह एवैनां ॥ 52

*(वपामि–यवमतीरव नयति–हविर्द्धान–मेव–त्रयोविꣳशतिश्च) (A11)*

## 13 असावादित्यो ऽस्मिन् ँल्लोक

**TS 7.3.10.1**

असावादित्यो ऽस्मिन् ँल्लोक आसीत् तं देवाः पृष्ठैः परिगृह्य सुवर्गं ँल्लोकमगमयन् परैरवस्तात् पर्यगृह्णन् दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन् परैः परस्तात् पर्यगृह्णन् पृष्ठैरुपावारोहन्थ्स वा असावादित्यो ऽमुष्मिन् ँल्लोके परैरुभयतः परिगृहीतो यत् पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं ँयजमाना यन्ति परैरवस्तात् परि गृह्णन्ति दिवाकीर्त्येन – [ ] **53**

**TS 7.3.10.2**

सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात् परि गृह्णन्ति पृष्ठैरुपावरोहन्ति यत् परे परस्तान्न स्युः पराञ्चः सुवर्गा–ल्लोकान्निष्पद्येरन्. यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परस्सामानो भवन्ति सुवर्ग एवैनान् ँल्लोक उभयतः परि गृह्णन्ति यजमाना वै दिवाकीर्त्यꣳ सँवथ्सरः परस्सामानो ऽभितो दिवाकीर्त्यं परस्सामानो भवन्ति सँवथ्सर एवोभयतः – [ ] **54**

**TS 7.3.10.3**

प्रति तिष्ठन्ति पृष्ठं ँवै दिवाकीर्त्यं पार्श्वे परस्सामानो ऽभितो
दिवाकीर्त्यं परस्सामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे
भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठꣳ शस्यते यज्ञस्यैव तन्मद्ध्यतो
ग्रन्थिं ग्रथ्नन्त्यविस्रꣳसाय सप्त गृह्यन्ते सप्त वै शीर्.षण्याः
प्राणाः प्राणानेव यजमानेषु दधति यत् पराचीनानि पृष्ठानि
भवन्त्यमुमेव तै-र्लोकमभ्यारोहन्ति यदिमं ँलोकं न - [ ] **55**

**TS 7.3.10.4**

प्रत्यव-रोहेयुरुद्-वा माद्येयुर्यजमानाः प्र वा मीयेरन्. यत्
प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव
लोके प्रति तिष्ठन्त्यनुन्मादायेन्द्रो वा अप्रतिष्ठित आसीथ् स प्रजापति
-मुपाधावत् तस्मा एतमेकविꣳशतिरात्रं प्रायच्छत् तमा ऽहरत्
तेनायजत ततो वै स प्रत्यतिष्ठद्-ये बहुयाजिनो ऽप्रतिष्ठिताः- [ ] **56**

**TS 7.3.10.5**

स्युस्त एकविꣳशतिरात्र-मासीरन् द्वादश मासाः पञ्चर्तवस्त्रय इमे
लोका असावादित्य एकविꣳश एतावन्तो वै देवलोकास्तेष्वेव

यथापूर्वं प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाधावत्
तस्मा एतमेकवि॰शतिरात्रं प्रायच्छत् तमा ऽहरत् तेनायजत ततो वै
सो ऽरोचत य एवं विद्वा॰स एकवि॰शतिरात्रमासते ( ) रोचन्त
एवैकवि॰शतिरात्रो भवति रुग्वा एकवि॰शो रुचमेव गच्छन्त्यथो
प्रतिष्ठामेव प्रतिष्ठा ह्येकवि॰शो ऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य
परिगृहीत्यै ॥ **57**

*(गृह्णन्ति दिवाकीर्त्यंनै – वोभयतो – ना – प्रतिष्ठिता – आसत – एकवि॰शतिश्च) (A10)*

## 14 सन्ततिर्वा एते ग्रहाः

**TB 1.2.3.1**

सन्ततिर्वा एते ग्रहाः । यत् परः सामानः । विषूवान्–दिवाकीर्त्यम् ।
यथा शालायै पक्षसी । एव॰ सँवथ्सरस्य पक्षसी ।
यदेतेन गृह्येरन्न् । विषूची सँवथ्सरस्य पक्षसी व्यवस्र॰ सेयाताम् ।
आर्तिमार्च्छेयुः । यदेते गृह्यन्ते ।
यथा शालायै पक्षसी मद्ध्यमं ँव॰शमभि समायच्छति । **58**

**TB 1.2.3.2**

एवꣳ सꣳवथ्सरस्य पक्षसी दिवाकीर्त्यमभि संतन्वन्ति ।

नार्तिमार्च्छन्ति ॥ एकविꣳश-महर्भवति । शुक्राग्रा ग्रहा गृह्यन्ते ।

प्रत्युत्तब्ध्यै सयत्वाय ॥ सौर्य एतदहः पशुरालभ्यते ।

सौर्योऽतिग्राह्यो गृह्यते । अहरेव रूपेण समर्द्धयन्ति ।

अथो अह्न एवैष बलिर् ह्रियते ॥

सप्तै-तदहरति-ग्राह्या गृह्यन्ते । **59**

**TB 1.2.3.3**

सप्त वै शीर्.षण्याः प्राणाः । असावादित्यः शिरः प्रजानाम् ।

शीर्.षन्नेव प्रजानां प्राणान् दधाति । तस्माथ्सप्त शीर्.षन् प्राणाः ॥

इन्द्रो वृत्रꣳ हत्वा । असुरान् पराभाव्य । स इमान् ꣳल्लोका-नभ्यजयत् ।

तस्यासौ लोकोऽनभिजित आसीत् । तं ꣳविश्वकर्मा भूत्वाऽभ्यजयत् ।

यद्-वैश्वकर्मणो गृह्यते । **60**

**TB 1.2.3.4**

सुवर्गस्य लोकस्याभिजित्यै ॥ प्र वा एतेऽस्माल् लोका-च्च्यवन्ते ।

ये वैश्वकर्मणं गृह्णते । आदित्यश्श्वो गृह्यते । इयं ꣳवा अदितिः ।

अस्यामेव प्रतितिष्ठन्ति ॥ अन्योन्यो गृह्येते ।

विश्वान्येवान्येन कर्माणि कुर्वाणा यन्ति । अस्यामन्येन प्रतितिष्ठन्ति ॥

तावाऽपरार्द्धाथ् सँवथ्सरस्या–न्योन्यो गृह्येते ( ) ॥

तावुभौ सह महाव्रते गृह्येते । यज्ञस्यैवान्तं गत्वा ।

उभयोर् लोकयोः प्रति तिष्ठन्ति ॥ अर्क्यमुक्थं भवति ।

अन्नाद्यस्यावरुद्ध्यै ॥ **61**

**( समायच्छ – त्यतिग्राह्या गृह्यन्ते – गृह्यते – सँवथ्सरस्यान्योन्यो गृह्येते पञ्च च )**

## 15 एकवि॒ꣳश एष भवति

**TB 1.2.4.1**

एकवि॒ꣳश एष भवति । एतेन वै देवा एकवि॒ꣳशेन ।

आदित्यमित उत्तमꣳ सुवर्गं ँलोक–मारोहयन्न् ।

स वा एष इत एकवि॒ꣳशः । तस्य दशावस्तादहानि । दश परस्तात् ।

स वा एष विराज्युभयतः प्रतिष्ठितः ।

विराजि हि वा एष उभयतः प्रतिष्ठितः । तस्मादन्तरेमौ लोकौ यन्न् ।

सर्वेषु सुवर्गेषु लोके-ष्वभितपन्नेति ॥ 62

**TB 1.2.4.2**

देवा वा आदित्यस्य सुवर्गस्य लोकस्य । पराचोऽतिपादादबिभयुः ।

तं छन्दोभिरदृ॒ᳫ् हन्धृत्यै । देवा वा आदित्यस्य सुवर्गस्य लोकस्य ।

अवाचोऽवपादादबिभयुः । तं पञ्चभी रश्मिभि-रुदवयन्न् ।

तस्मादेकविᳫ्शे ऽहन् पञ्च दिवाकीर्त्यानि क्रियन्ते ।

रश्मयो वै दिवाकीर्त्यानि ॥ ये गायत्रे ।

ते गायत्रीषूत्तरयोः पवमानयोः । 63

**TB 1.2.4.3**

महादिवाकीर्त्यᳫ् होतुः पृष्ठम् । विकर्णं ब्रह्मसामम् । भासोऽग्निष्टोमः ॥

अथैतानि पराणि । परैर्वै देवा आदित्यᳫ् सुवर्गं ँलोकमपारयन्न् ।

यदपारयन्न् । तत् पराणां परत्वम् । पारयन्त्येनं पराणि । य एवं ँवेद ।

अथैतानि स्पराणि ( ) । स्परैर्वै देवा आदित्यᳫ् सुवर्गं ँलोकमस्पारयन्न् ।

यदस्पारयन्न् । तथ् स्पराणाᳮ स्परत्वम् । स्पारयन्त्येनᳮ स्पराणि ।

य एवं ँवेद ॥ 64 *(एति-पवमानयोः-स्पराणी पञ्च च)*

## 16 इन्द्रो वृत्रꣳ हत्वा

**TB 1.3.10.1**

इन्द्रो वृत्रꣳ हत्वा । असुरान् पराभाव्य । सोऽमावास्यां प्रत्यागच्छत् ।

ते पितरः पूर्वेद्यु–रागच्छन्न् । पितॄन्. यज्ञोऽगच्छत् ।

तं देवाः पुनरयाचन्त । तमेभ्यो न पुनरददुः ।

तेऽब्रुवन् वरं वृँणामहै ।

अथ वः पुनर्दास्यामः ।

अस्मभ्यमेव पूर्वेद्युः क्रियाता इति । **65**

**TB 1.3.10.2**

तमेभ्यः पुनरददुः । तस्मात्–पितृभ्यः पूर्वेद्युः क्रियते ।

यत् पितृभ्यः पूर्वेद्युः करोति ।

पितृभ्य एव तद्–यज्ञं निष्क्रीय यजमानः प्रतनुते ॥

सोमाय पितृपीताय स्वधा नम इत्याह ।

पितुरेवाधि सोमपीथमवरुन्धे ।

न हि पिता प्रमीयमाण आहैष सोमपीथ इति ।

इन्द्रियं  वै सोमपीथः । इन्द्रियमेव सोमपीथमवरुन्धे ।
तेनेन्द्रियेण द्वितीयां जायामभ्यश्ञुते ॥ **66**

**TB 1.3.10.3**

एतद् वै ब्राह्मणं पुरा वाजश्रवसा विदामक्रन्न् ।
तस्मात् ते द्वेद्वे जाये अभ्याक्षत । य एवं  वेद ।
अभि द्वितीयां जायामश्ञुते ॥
अग्नये कव्यवाहनाय स्वधा नम इत्याह । य एव पितृणामग्निः ।
तं प्रीणाति ॥ तिस्र आहुतीर् जुहोति ॥ त्रिर्निदधाति ॥
षट्थ् संपद्यन्ते । **67**

**TB 1.3.10.4**

षड्वा ऋतवः । ऋतूनेव प्रीणाति ॥ तूष्णीं मेक्षण–मादधाति ।
अस्ति वा हि षष्ठ ऋतुर्न वा ॥ देवान्. वै पितॄन् प्रीतान् ।
मनुष्याः पितरोऽनुप्रपिपते । तिस्र आहुतीर् जुहोति । त्रिर्निदधाति ।
षट्थ् संपद्यन्ते । षड्वा ऋतवः । **68**

**TB 1.3.10.5**

ऋतवः खलु वै देवाः पितरः । ऋतूनेव देवान् पितॄन् प्रीणाति ।
तान्प्रीतान् । मनुष्याः पितरोऽनुप्रपिपते ॥

सकृदाच्छिन्नं बर्.हिर् भवति । सकृदिव हि पितरः ॥ त्रिर्निदधाति ।

तृतीये वा इतो लोके पितरः । तानेव प्रीणाति ॥

पराङावर्तते । **69**

**TB 1.3.10.6**

ह्लीका हि पितरः ॥ ओष्मणो व्यावृत उपास्ते ।

ऊष्मभागा हि पितरः ॥ ब्रह्मवादिनो वदन्ति ।

प्राश्यां(3)न प्राश्या(3)मिति । यत् प्राश्ञीयात् । जन्यमन्नमद्यात् ।

प्रमायुकः स्यात् । यन्न प्राश्ञीयात् । अहविः स्यात् । **70**

**TB 1.3.10.7**

पितृभ्य आवृश्च्येत । अवघ्रेयमेव । तन्नेव प्राशितं नेवाप्राशितम् ॥

वीरं ँवा वै पितरः प्रयन्तो हरन्ति । वीरं ँवा ददति । दशां छिनत्ति ।

हरणभागा हि पितरः । पितॄनेव निरवदयते ॥

उत्तर आयुषि लोम छिन्दीत । पितृणा७ ह्येतर्.हि नेदीयः ॥ **71**

**TB 1.3.10.8**

नमस्करोति । नमस्कारो हि पितृणाम् ॥ नमो वः पितरो रसाय ।

नमो वः पितरः शुष्माय । नमो वः पितरो जीवाय ।

नमो वः पितरः स्वधायै । नमो वः पितरो मन्यवे ।

नमो वः पितरो घोराय । पितरो नमो वः ।

य एतस्मिन् ँल्लोके स्थ । **72**

**TB 1.3.10.9**

युष्माꣳस्तेऽनु । येऽस्मिन् ँल्लोके । मां ते ऽनु । य एतस्मिन् ँल्लोके स्थ ।

यूयं तेषां ँवसिष्ठा भूयास्त । येऽस्मिन् ँल्लोके ।

अहं तेषां ँवसिष्ठो भूयासमित्याह । वसिष्ठः समानानां भवति ।

य एवं ँविद्वान्–पितृभ्यः करोति ॥

एष वै मनुष्याणां ँयज्ञः । **73**

**TB 1.3.10.10**

देवानां ँवा इतरे यज्ञाः । तेन वा एतत् पितृलोके चरति ॥

यत् पितृभ्यः करोति । स ईश्वरः प्रमेतोः । प्राजापत्ययर्चा पुनरैति ।

यज्ञो वै प्रजापतिः । यज्ञेनैव सह पुनरैति । न प्रमायुको भवति ॥

पितृलोके वा एतद्–यजमानश्चरति । यत् पितृभ्यः करोति ( ) ।

स ईश्वर आर्तिमार्तोः । प्रजापति–स्त्वावैनं तत उन्नेतुमर्.हतीत्याहुः ।

यत् प्राजापत्ययर्चा पुनरैति । प्रजापतिरेवैनं तत उन्नयति ।

नार्तिमार्च्छति यजमानः ॥ **74**

*(इत्य – ञ्नुते – पद्यन्ते – पद्यन्ते षड्वा ऋतवो – वर्ततेऽ – हविः स्यान् – नेदीयः – स्थ – यज्ञो – यजमानश्चरति यत् पितृभ्यः करोति पञ्च च)*

## 17 वैश्वदेवेन वै प्रजापतिः

**T.B.1.6.8.1**

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत ।
ता वरुणप्रघासैर्–वरुणपाशादमुञ्चत् । साकमेधैः प्रत्यस्थापयत् ।
त्र्यम्बकै रुद्रं निरवादयत । पितृयज्ञेन सुवर्गं ँलोकमगमयत् ।
यद्–वैश्वदेवेन यजते । प्रजा एव तद्–यजमानः सृजते ।
ता वरुणप्रघासैर्–वरुणपाशान्–मुञ्चति ।
साकमेधैः प्रतिष्ठापयति । त्र्यम्बकै रुद्रं निरवदयते । **75**

**T.B.1.6.8.2**

पितृयज्ञेन सुवर्गं ँलोकं गमयति । दक्षिणतः प्राचीनावीती निर्वपति ।
दक्षिणावृद्धि पितृणाम् । अनादृत्य तत् । उत्तरत एवोपवीय निर्वपेत् ।
उभये हि देवाश्च पितरश्चेज्यन्ते । अथो यदेव दक्षिणार्द्धेऽधिश्रयति ।

तेन दक्षिणावृत् । सोमाय पितृमते पुरोडाश॒ꣳ षट्कपालं निर्वपति ।

सम्ँवथ्सरो वै सोमः पितृमान् । **76**

**T.B.1.6.8.3**

सम्ँवथ्सरमेव प्रीणाति । पितृभ्यो बर्.हिषद्भ्यो धानाः ।

मासा वै पितरो बर्.हिषदः । मासानेव प्रीणाति ।

यस्मिन् वा ऋतौ पुरुषः प्रमीयते । सोऽस्यामुष्मिन् ँल्लोके भवति ।

बहुरूपा धाना भवन्ति । अहोरात्राणा–मभिजित्यै ।

पितृभ्यो ऽग्निष्वात्तेभ्यो मन्थम् ।

अर्द्धमासा वै पितरोऽग्निष्वात्ताः । **77**

**T.B.1.6.8.4**

अर्द्धमासानेव प्रीणाति । अभिवान्यायै दुग्धे भवति ।

सा हि पितृदेवत्यं दुहे । यत् पूर्णम् । तन् मनुष्याणाम् ।

उपर्यर्द्धो देवानाम् । अर्द्धः पितृणाम् । अर्द्ध उपमन्थति ।

अर्द्धो हि पितृणाम् । एकयोपमन्थति । **78**

**T.B.1.6.8.5**

एका हि पितृणाम् । दक्षिणोपमन्थति । दक्षिणावृद्धि पितृणाम् ।

अनारभ्योपमन्थति । तद्धि पितॄन्–गच्छति ।

इमां दिशं वेँदिमुद्धन्ति ।

उभये हि देवाश्च पितरश्चेज्यन्ते । चतुः स्रक्तिर्भवति ।

सर्वा ह्यनु दिशः पितरः । अखाता भवति । **79**

**T.B.1.6.8.6**

खाता हि देवानाम् । मद्ध्यतो ऽग्निराधीयते ।

अन्ततो हि देवाना–माधीयते ।

वर्.षीयानिद्ध्म इद्ध्माद्–भवति व्यावृत्त्यै ।

परिश्रयति । अन्तर्.हितो हि पितृलोको मनुष्यलोकात् ।

यत्–परुषि दिनम् । तद्–देवानाम् ।

यदन्तरा । तन्–मनुष्याणाम् । **80**

**T.B.1.6.8.7**

यथ् समूलम् । तत् पितृणाम् । समूलं बर्.हिर्–भवति व्यावृत्त्यै ।

दक्षिणा स्तृणाति । दक्षिणावृद्धि पितृणाम् । त्रिः पर्येति ।

तृतीये वा इतो लोके पितरः । तानेव प्रीणाति ।

त्रिः पुनः पर्येति । षट्थ्संपद्यन्ते । **81**

**T.B.1.6.8.8**

षड्वा ऋतवः । ऋतूनेव प्रीणाति । यत् प्रस्तरं ँयजुषा गृह्णीयात् ।
प्रमायुको यजमानः स्यात् । यन्न गृह्णीयात् । अनायतनः स्यात् ।
तूष्णीमेव न्यस्येत् । न प्रमायुको भवति । नानायतनः ।
यत्–त्रीन्–परिधीन् परिदद्ध्यात् । 82

**T.B.1.6.8.9**

मृत्युना यजमानं परिगृह्णीयात् । यन्न परि–दद्ध्यात् ।
रक्षाꣳसि यज्ञꣳ हन्युः । द्वौ परिधी परिदधाति । रक्षसा–मपहत्यै ।
अथो मृत्योरेव यजमान–मुथ्सृजति ।
यत् त्रीणि त्रीणि हवीꣳष्युदाहरेयुः । त्रयस्त्रय एषाꣳ साकं प्रमीयेरन्न् ।
एकैक–मनूचीना–न्युदाहरन्ति ।
एकैक एवैषामन्वञ्चः प्रमीयते ( ) । कशिपु कशिपव्याय ।
उपबर्.हण–मुपबर्.हण्याय । आञ्जन–माञ्जन्याय ।
अभ्यञ्जन–मभ्यञ्जन्याय । यथाभागमेवैनान् प्रीणाति ॥ 83

*(निरवदयते – पितृमा – नग्निष्वात्ता – एकयोप मन्थ – त्यखाता भवति–मनुष्याणां – पद्यन्ते – परिदद्ध्यान् – मीयते पञ्च च) (A8)*

## 18 अग्नये देवेभ्यः

**T.B.1.6.9.1**

अग्नये देवेभ्यः पितृभ्यः समिद्ध्यमानायानुब्रूहीत्याह ।

उभये हि देवाश्च पितरश्चेज्यन्ते । एकामन्वाह । एका हि पितृणाम् ।

त्रिरन्वाह । त्रिर्.हि देवानाम् । आघारावाघारयति ।

यज्ञ परुषोरनन्तरित्यै । नार्.षेयं वृणीते । न होतारम् । **84**

**T.B.1.6.9.2**

यदार्.षेयं वृणीत । यद्धोतारम् । प्रमायुको यजमानः स्यात् ।

प्रमायुको होता । तस्मान्न वृणीते । यजमानस्य होतुर्–गोपीथाय ।

अपबर्.हिषः प्रयाजान्. यजति । प्रजा वै बर्.हिः ।

प्रजा एव मृत्योरुथ्सृजति । आज्यभागौ यजति । **85**

**T.B.1.6.9.3**

यज्ञस्यैव चक्षुषी नान्तरेति । प्राचीनावीती सोमं यजति ।

पितृदेवत्या हि । एषा ऽऽहुतिः । पञ्चकृत्वोऽवद्यति ।

पञ्च ह्येता देवताः । द्वे पुरोऽनुवाक्ये । याज्या देवता वषट्कारः ।

ता एव प्रीणाति । सन्ततमवद्यति । **86**

**T.B.1.6.9.4**

ऋतूना॒ꣳ संतत्यै । प्रैवैभ्यः पूर्वया पुरोनुवाक्यया ऽऽह ।

प्रणयति द्वितीयया । गमयति याज्यया । तृतीये वा इतो लोके पितरः ।

अह्न एवैनान् पूर्वया पुरोनुवाक्यया ऽत्यानयति । रात्रियै द्वितीयया ।

ऐवैनान्. याज्यया गमयति । दक्षिणतोऽवदाय ।

उदङ्ङतिक्रामति व्यावृत्त्यै । **87**

**T.B.1.6.9.5**

आ स्वधेत्याश्रावयति । अस्तु स्वधेति प्रत्याश्रावयति ।

स्वधा नम इति वषट्करोति । स्वधाकारो हि पितृणाम् ।

सोममग्रे यजति । सोमप्रयाजा हि पितरः । सोमं पितृमन्तं ँयजति ।

सम्ँवथ्सरो वै सोमः पितृमान् । सम्ँवथ्सरमेव तद्–यजति ।

पितॄन्–बर्.हिषदो यजति । **88**

**T.B.1.6.9.6**

ये वै यज्वानः । ते पितरो बर्.हिषदः । तानेव तद्–यजति ।

पितॄनग्निष्वात्तान्. यजति । ये वा अयज्वानो गृहमेधिनः ।

ते पितरोऽग्निष्वात्ताः । तानेव तद्–यजति ।

अग्निं कव्यवाहनं ँयजति ।

य एव पितृणामग्निः । तमेव तद्–यजति । **89**

**T.B.1.6.9.7**

अथो यथाऽग्नि७ स्विष्टकृतं ँयजति । तादृगेव तत् ।

एतत्ते तत ये च त्वामन्विति तिसृषु स्रक्तीषु निदधाति ।

तस्मादातृतीयात् पुरुषान्नाम न गृह्णन्ति । एतावन्तो हीज्यन्ते ।

अत्र पितरो यथाभागं मन्ददध्वमित्याह । ह्लीका हि पितरः ।

उदञ्चो निष्क्रामन्ति । एषा वै मनुष्याणां दिक् ।

स्वामेव तद्–दिशमनु निष्क्रामन्ति । **90**

**T.B.1.6.9.8**

आहवनीय–मुपतिष्ठन्ते । न्येवास्मै तद्ध्नुवते । यथ्सत्याहवनीये ।

अथान्यत्र चरन्ति । आतमितोरुपतिष्ठन्ते । अग्निमेवोपद्रष्टारं कृत्वा ।

पितॄन्–निरवदयन्ते । अन्तं ँवा एते प्राणानां गच्छन्ति ।

य आतमितोरुपतिष्ठन्ते । सुसन्दृशं त्वा वयमित्याह । **91**

**T.B.1.6.9.9**

प्राणो वै सुसन्दृक् । प्राणमेवात्मन्–दधते ।

योजा न्विन्द्र ते हरी इत्याह । प्राणमेव पुनरयुक्त ।

अक्षन्नमीमदन्त हीति गार्.हपत्य-मुपतिष्ठन्ते ।

अक्षन्नमीमदन्ताथ त्वोपतिष्ठामह इति वावैतदाह ।

अमीमदन्त पितरः सोम्या इत्यभि प्रपद्यन्ते ।

अमीमदन्त पितरोऽथ त्वाऽभि प्रपद्यामह इति वावैतदाह ।

अपः परिषिञ्चति । मार्जयत्येवैनान् । **92**

**T.B.1.6.9.10**

अथो तर्पयत्येव । तृप्यति प्रजया पशुभिः । य एवं वेद ।

अप बर्.हिषावनूयाजौ यजति । प्रजा वै बर्.हिः ।

प्रजा एव मृत्योरुथ्सृजति । चतुरः प्रयाजान्. यजति । द्वावनूयाजौ ।

षट्थ्संपद्यन्ते । षड्वा ऋतवः ( ) । **93**

**T.B.1.6.9.11**

ऋतूनेव प्रीणाति । न पत्न्यन्वास्ते ।

न सम्ँयाजयन्ति । यत्पत्न्यन्वासीत ।

यथ्सम्ँयाजयेयुः । प्रमायुका स्यात् ।

तस्मान्नान्वास्ते । न सम्ँयाजयन्ति ।

पत्नियै गोपीथाय ॥ **94**

*(होतार – माज्यभागौ यजति – सन्ततमवद्यति – व्यावृत्त्यै – बर्.हिषदो यजति – तमेव तद् यज– त्यनु निष्क्रामन्त्या – है – नान् – ऋतवो – +नव च) (A9)*

## 19 उशन्तस्त्वा हवामह

**T.B.2.6.16.1**

उशन्तस्त्वा हवामह आ नो अग्ने सुकेतुना ।

त्वꣳ सोम महे भगं त्वꣳ सोम प्रचिकितो मनीषा ।

त्वया हि नः पितरः सोम पूर्वे त्वꣳ सोम पितृभिः

सम्ँविदानः ।

बर्.हिषदः पितर आऽहं पितॄन् ।

उपहूताः पितरो ऽग्निष्वात्ताः पितरः ॥

अग्निष्वात्तानृतुमतो हवामहे । नराशꣳसे सोमपीथं ँय आशुः ।

ते नो अर्वन्तः सुहवा भवन्तु । शं नो भवन्तु द्विपदे शं चतुष्पदे ॥

ये अग्निष्वात्ता येऽनग्निष्वात्ताः । **95**

**T.B.2.6.16.2**

अ॒ꣳ॒हो॒मुचः॒ पित॑रः॒ सो॒म्यासः॑ । परे॑ऽवरे॒ऽमृता॑सो॒ भव॑न्तः ।

अधि॑ब्रुवन्तु॒ ते अ॑वन्त्व॒स्मान् ॥ वा॒न्याये॑ दु॒ग्धे जु॒षमा॑णाः क॒रम्भम् ।

उ॒दीरा॑णा॒ अव॑रे॒ परे॑ च । अ॒ग्नि॒ष्वा॒त्ता ऋ॒तुभिः॑ सम्ँ॑वि॒दा॒नाः ।

इन्द्र॑वन्तो ह॒वि॒रि॒दं जु॑षन्ताम् ॥

यद॑ग्ने कव्यवाह॒न त्वम॑ग्न ईडि॒तो जा॑तवेदः ।

मात॑ली क॒व्यैः ॥ ये ता॑तृ॒पुर्दे॑व॒त्रा जेह॑मानाः ( ) ।

हो॒त्रा॒वृ॒धः स्तोम॑तष्टासो अ॒र्कैः । आऽग्ने॑ याहि सु॒वि॒दत्रे॑भि॒र्वाङ् ।

स॒त्यैः क॒व्यैः पि॒तृभि॑र्–घर्म॒सद्भिः॑ ॥ ह॒व्य॒वाह॑म॒जरं॑ पुरु॒प्रि॒यम् ।

अ॒ग्निं घृ॒तेन॑ ह॒विषा॑ सप॒र्यन्न् । उपा॑सदं कव्य॒वाहं॑ पितृ॒णाम् ।

स नः॑ प्र॒जां ँ॑वी॒रव॒ती॒ꣳ॒ समृ॑ण्वतु ॥ **96**

**(अन॑ग्निष्वा॒त्ता – जेह॑मानाः स॒प्त च)**

# त्रीणाचीकेतं

## 20 अयं वाव यः

**T.B.3.11.7.1**

अयं ँवाव यः पवते । सोऽग्नि र्नाचिकेतः । स यत् प्राङ् पवते ।

तदस्य शिरः । अथ यद् दक्षिणा । स दक्षिणः पक्षः ।

अथ यत् प्रत्यक् । तत् पुच्छं । य दुदङ्ङ् । स उत्तरः पक्षः । **97**

**T.B.3.11.7.2**

अथ यथ् सम्ँवाति । तदस्य समञ्चनं च प्रसारणं च ।

अथो संपदेवास्य सा ॥ स७ँ ह वा अस्मै स कामः पद्यते ।

यत् कामो यजते । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन–मेवं ँवेद ॥ यो ह वा अग्ने र्नाचिकेतस्यायतनं

प्रतिष्ठां ँवेद । आयतनवान् भवति । गच्छति प्रतिष्ठां । **98**

**T.B.3.11.7.3**

हिरण्यं ँवा अग्ने र्नाचिकेतस्यायतनं प्रतिष्ठा । य एवं ँवेद ।

आयतनवान् भवति । गच्छति प्रतिष्ठां ॥

यो ह वा अग्ने र्नाचिकेतस्य शरीरं ँवेद ।

स शरीर एव स्वर्गं ँलोकमेति ।

हिरण्यं ँवा अग्ने नाचिकेतस्य शरीरं ।
य एवं ँवेद । स शरीर एव स्वर्गं ँलोकमेति ॥
अथो यथा रुक्म उत्–तप्तो भाय्यात् । **99**

**T.B.3.11.7.4**

एवमेव स तेजसा यशसा । अस्मिꣳश्च लोके–ऽमुष्मिꣳश्च भाति ॥
उरवो ह वै नामैते लोकाः । ये–ऽवरेणादित्यं ।
अथ हैते वरीयाꣳसो लोकाः । ये परेणादित्यं ।
अन्तवन्तꣳ ह वा एष क्षय्यं ँलोकं जयति । यो–ऽवरेणादित्यं ।
अथ हैषो–ऽनन्त–मपार–मक्षय्यं ँलोकं जयति ।
यः परेणादित्यं ( ) ॥ **100**

**T.B.3.11.7.5**

अनन्तꣳ ह वा अपार–मक्षय्यं ँलोकं जयति ।
योऽग्निं नाचिकेतं चिनुते । य उ चैन–मेवं ँवेद ॥
अथो यथा रथे तिष्ठन् पक्षसी पर्या–वर्तमाने प्रत्यपेक्षते ।
एव–महोरात्रे प्रत्यपेक्षते ।

नास्या-होरात्रे लोकमाप्नुतः । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन-मेवं ँवेद ॥ 101

**(उत्तरः पक्षो - गच्छति प्रतिष्ठां - भाय्याद् - यः परेणादित्य -मष्टौ च )**

## 21 उशन् ह वै

**T.B.3.11.8.1**

उशन्. ह वै वाजश्रवसः सर्ववेदसं ददौ ।
तस्य ह नचिकेता नाम पुत्र आस । तꣳ ह कुमारꣳ सन्तं ।
दक्षिणासु नीयमानासु श्रद्धा ऽऽविवेश । स होवाच ।
तत कस्मै मां दास्यसीति । द्वितीयं तृतीयं ॥ तꣳ ह परीत उवाच ।
मृत्यवे त्वा ददामीति ॥ तꣳ ह स्मोत्थितं ँवागभिवदति । 102

**T.B.3.11.8.2**

गौतम कुमारमिति । स होवाच । परेहि मृत्यो गृहान् ।
मृत्यवे वै त्वाऽदा-मिति ॥ तं ँवै प्रवसन्तं गन्तासीति होवाच ।
तस्य स्म तिस्रो रात्री-रनाश्वान् गृहे वसतात् । स यदि त्वा पृच्छेत् ।

कुमार कति रात्री–रवात्सी–रिति । तिस्र इति प्रति ब्रूतात् ।

किं प्रथमा॑ रात्रि–माऽना इति । **103**

**T.B.3.11.8.3**

प्रजां त इति । किं द्वितीया–मिति । पशू॑स्त इति ।

किं तृतीया–मिति । साधुकृत्यां त इति ॥ तं ँवै प्रवसन्तं जगाम ।

तस्य ह तिस्रो रात्री–रनाश्वान् गृह उवास । तमागत्य पप्रच्छ ।

कुमार कति रात्री–रवात्सी–रिति । तिस्र इति प्रत्युवाच । **104**

**T.B.3.11.8.4**

किं प्रथमा॑ रात्रि–माऽना इति । प्रजां त इति ।

किं द्वितीया–मिति । पशू॑स्त इति । किं तृतीया–मिति ।

साधुकृत्यां त इति ॥ नमस्ते अस्तु भगव इति होवाच ।

वरं ँवृणीष्वेति ॥ पितरमेव जीवन्नयानीति ॥

द्वितीयं ँवृणीष्वेति । **105**

**T.B.3.11.8.5**

इष्टापूर्तयो मे ऽक्षितिं ब्रूहीति होवाच ।

तस्मै हैतमग्निं नाचिकेत–मुवाच ।

ततो वै तस्ये–ष्टापूर्ते ना क्षीयेते ॥

नास्येष्टा-पूर्ते क्षीयेते । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन-मेवं वेद ॥ तृतीयं वृणीष्वेति ।

पुन र्मृत्यो र्मे ऽपजितिं ब्रूहीति होवाच ।

तस्मै हैतमग्निं नाचिकेत-मुवाच ।

ततो वै सोऽप पुन र्मृत्यु-मजयत् । **106**

**T.B.3.11.8.6**

अप पुन र्मृत्युं जयति । योऽग्निं नाचिकेतं चिनुते ॥

य उ चैन-मेवं वेद ॥ प्रजापति र्वै प्रजाकाम-स्तपो-ऽतप्यत ।

स हिरण्य-मुदास्यत् । त-दग्नौ प्रास्यत् । त-दस्मै नाच्छदयत् ।

तद् द्वितीयं प्रास्यत् । त-दस्मै नै वाच्छदयत् ।

तत् तृतीयं प्रास्यत् । **107**

**T.B.3.11.8.7**

त-दस्मै नै वाच्छदयत् ।

त-दात्म-न्नेव हृदय्येऽग्नौ वैश्वानरे प्रास्यत् ।

त-दस्मा अच्छदयत् । तस्माद्धिरण्यं कनिष्ठं धनानां ।

भुञ्जत् प्रियतमं । हृदयज꣡ हि । स वै तमेव नाविन्दत् ।

यस्मै तां दक्षिणा–मनेष्यत् ।

ता७ स्वायैव हस्ताय दक्षिणायानयत् ।

तां प्रत्यगृह्णात् । **108**

**T.B.3.11.8.8**

दक्षाय त्वा दक्षिणां प्रतिगृह्णामीति । सो ऽदक्षत दक्षिणां प्रतिगृह्य ।

दक्षते ह वै दक्षिणां प्रतिगृह्य । य एवं ँवेद ॥

एतद्ध स्म वै तद् विद्वा७ंसो वाजश्रवसा गोतमाः ।

अप्यनूदेश्यां दक्षिणां प्रतिगृह्णन्ति ।

उभयेन वयं दक्षिष्यामह एव दक्षिणां प्रतिगृह्येति ।

ते ऽदक्षन्त दक्षिणां प्रतिगृह्य ।

दक्षते ह वै दक्षिणां प्रतिगृह्य । य एवं ँवेद ( ) ।

प्र हान्यं ँव्लीनाति ॥ **109**

**(वद – त्याश्ना इ – त्युवाच – द्वितीयं ँवृणीष्वे – त्यजयत् – तृतीयं प्रास्यत् – गृह्णाद् – य एवं ँवेदैकं च )**

## 22 तᳪ हैतमेके

**T.B.3.11.9.1**

तᳪ हैत-मेके पशुबन्ध एवोत्तरवेद्यां चिन्वते ।

उत्तरवेदिसम्मित एषोऽग्निरिति वदन्तः ।

तन्न तथा कुर्यात् । एत-मग्निं कामेन व्यर्द्धयेत् ।

स एनं कामेन व्यृद्धः । कामेन व्यर्द्धयेत् ।

सौम्ये वावैनमध्वरे चिन्वीत । यत्र वा भूयिष्ठा आहुतयो हूयेरन्न् ।

एत-मग्निं कामेन समर्द्धयति । स एनं कामेन समृद्धः । **110**

**T.B.3.11.9.2**

कामेन समर्द्धयति ॥ अथ हैनं पुरर्.षयः ।

उत्तरवेद्या-मेव सन्निय-मचिन्वत । ततो वै तेऽविन्दन्त प्रजां ।

अभि स्वर्गं ँलोक-मजयन्न् । विन्दत एव प्रजां ।

अभि स्वर्गं ँलोकं जयति । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन-मेवं ँवेद ॥ अथ हैनं ँवायुर्. ऋद्धिकामः । **111**

**T.B.3.11.9.3**

यथान्युप्त-मेवोपदधे । ततो वै स एता-मृद्धि-मार्द्ध्नोत् ।

यामिदं ँवायुर्. ऋद्धः । एता-मृद्धि-मृद्ध्नोति ।

यामिदं ँवायुर्. ऋद्धः । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन-मेवं ँवेद ॥ अथ हैनं गोबलो वार्ष्णः पशुकामः ।

पांक्तमेव चिक्ये । पञ्च पुरस्तात् । **112**

**T.B.3.11.9.4**

पञ्च दक्षिणतः । पञ्च पश्चात् । पञ्चोत्तरतः । एकां मद्ध्ये ।

ततो वै स सहस्रं पशून् प्राप्नोत् । प्र सहस्रं पशू-नाप्नोति ।

योऽग्निं नाचिकेतं चिनुते । य उ चैन-मेवं ँवेद ॥

अथ हैनं प्रजापति ज्यैष्ठ्यकामो यशस्कामः प्रजननकामः ।

त्रिवृतमेव चिक्ये । **113**

**T.B.3.11.9.5**

सप्त पुरस्तात् । तिस्रो दक्षिणतः । सप्त पश्चात् । तिस्र उत्तरतः ।

एकां मद्ध्ये । ततो वै स प्र यशो ज्यैष्ठ्य-माप्नोत् ।

एतां प्रजातिं प्राजायत । यामिदं प्रजाः प्रजायन्ते ।

त्रिवृद् वै ज्यैष्ठ्यं । माता पिता पुत्रः । **114**

**T.B.3.11.9.6**

त्रिवृत् प्रजननं । उपस्थो योनि र्मद्ध्यमा ।

प्रयशो ज्यैष्ठ्य-माप्नोति । एतां प्रजातिं प्रजायते ।

यामिदं प्रजाः प्रजायन्ते । योऽग्निं नाचिकेतं चिनुते ।
य उ चैनमेवं वेँद ॥ अथ हैन-मिन्द्रो ज्यैष्ठ्यकामः ।
ऊर्द्ध्वा एवोपदधे । ततो वै स ज्यैष्ठ्य-मगच्छत् । **115**

**T.B.3.11.9.7**

ज्यैष्ठ्यं गच्छति । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन-मेवं वेँद ॥ अथ हैन-मसावादित्यः स्वर्गकामः ।
प्राचीरेवोपदधे । ततो वै सोऽभि स्वर्गं लोँक-मजयत् ।
अभि स्वर्गं लोँकं जयति । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन-मेवं वेँद ॥ स यदीच्छेत् । **116**

**T.B.3.11.9.8**

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति ।
प्राङ्होतुर्द्धिष्ण्या-दुथ्सर्पेत् । येयं प्रागाद् यशस्वती ।
सा मा प्रोर्णोतु । तेजसा यशसा ब्रह्मवर्चसेनेति ।
तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति ॥ अथ यदीच्छेत् ।
भूयिष्ठं मे श्रद्दधीरन्न् । भूयिष्ठा दक्षिणा नयेयुरिति ।

दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य

स्वाहेति स्रुवेणो–पहत्या हवनीये जुहुयात् । **117**

**T.B.3.11.9.9**

भूयिष्ठ–मेवास्मै श्रद्धधते । भूयिष्ठा दक्षिणा नयन्ति ॥

पुरीष–मुपधाय । चिति–क्लृप्तिभि–रभिमृश्य ।

अग्निं प्रणीयोपसमाधाय । चतस्र एता आहुती र्जुहोति ।

त्वमग्ने रुद्र इति शतरुद्रीयस्य रूपं ।

अग्नाविष्णू इति वसोर्द्धारायाः । अन्नपत इत्यन्न होमः ।

सप्त ते अग्ने समिधः सप्त जिह्वा इति विश्वप्रीः ( ) ॥ **118**

**(समृद्ध – ऋद्धिकामः – पुरस्तात् – चिक्ये – पुत्रो – ऽगच्छ – दिच्छेत् – जुहुयात् – विश्वप्रीः )**

**Special Korvai**

(पुरर्.षयो वायुर् गोबलः सहस्रं प्रजापति स्त्रिवृदिन्द्रो

ऽसावादित्यः स यदीच्छेत् )

## 23 यां प्रथमामिष्टका

**T.B.3.11.10.1**

यां प्रथमा-मिष्टका-मुपदधाति । इमं तया लोक-मभिजयति ।

अथो या अस्मिन् ँल्लोके देवताः ।

तासा७ँ सायुज्य७ँ सलोकता-माप्नोति । यां द्वितीया-मुपदधाति ।

अन्तरिक्षलोकं तयाऽभिजयति ।

अथो या अन्तरिक्षलोके देवताः ।

तासा७ँ सायुज्य७ँ सलोकता-माप्नोति ।

यां तृतीया-मुपदधाति ।

अमुं तया लोक-मभिजयति । **119**

**T.B.3.11.10.2**

अथो या अमुष्मिन् ँल्लोके देवताः ।

तासा७ँ सायुज्य७ँ सलोकता-माप्नोति ।

अथो या अमूरितरा अष्टादश ।

य एवामी उरवश्च वरीया७ँसश्च लोकाः ।

तानेव ताभि-रभिजयति ॥

कामचारो ह वा अस्योरुषु च वरीयस्सु च लोकेषु भवति ।
योऽग्निं नाचिकेतं चिनुते । य उ चैन-मेवं वेद ॥
सम्ँवथ्सरो वा अग्नि र्नाचिकेतः । तस्य वसन्तः शिरः । **120**

**T.B.3.11.10.3**

ग्रीष्मो दक्षिणः पक्षः । वर्.षा उत्तरः । शरत् पुच्छं ।
मासाः कर्मकाराः । अहोरात्रे शतरुद्रीयं । पर्जन्यो वसोर्द्धारा ।
यथा वै पर्जन्यः सुवृष्टं वृष्ट्वा ।
प्रजाभ्यः सर्वान् कामान्थ् संपूरयति ।
एव-मेव स तस्य सर्वान् कामान्थ् संपूरयति ।
योऽग्निं नाचिकेतं चिनुते । **121**

**T.B.3.11.10.4**

य उ चैन-मेवं वेद ॥ सम्ँवथ्सरो वा अग्नि र्नाचिकेतः ।
तस्य वसन्तः शिरः । ग्रीष्मो दक्षिणः पक्षः ।
वर्.षाः पुच्छं । शरदुत्तरः पक्षः । हेमन्तो मद्ध्यं ।
पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषं । अहोरात्राणीष्टकाः ( ) ।
एष वाव सोऽग्नि-रग्निमयः पुनर्णवः ।

अग्निमयो ह वै पुनर्णवो भूत्वा । स्वर्गं ँलोक-मेति ।
आदित्यस्य सायुज्यं । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन-मेवं ँवेद ॥ 122

**(अमुं तया लोकमभिजयति - शिरः - चिनुत - इष्टकाः षट्च )**

## 24 ऋचां प्राची

**T.B.3.12.9.1**

ऋचां प्राची महती दिगुच्यते । दक्षिणा-माहु र्यजुषामपारां ।
अथर्वणा-मङ्गिरसां प्रतीची । साम्ना-मुदीची महती दिगुच्यते ॥
ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मद्ध्ये अह्नः ।
सामवेदे-नास्तमये महीयते । वेदै-रशून्य-स्त्रिभिरेति सूर्यः ॥
ऋग्भ्यो जाताꣳ सर्वशो मूर्ति-माहुः ।
सर्वा गति र्याजुषी हैव शश्वत् । 123

**T.B.3.12.9.2**

सर्वं तेज स्सामरूप्यꣳ ह शश्वत् । सर्वꣳ हेदं ब्रह्मणा हैव सृष्टं ॥
ऋग्भ्यो जातं ँवैश्यं ँवर्ण-माहुः । यजुर्वेदं क्षत्रियस्या-हुर्योनिं ।
सामवेदो ब्राह्मणानां प्रसूतिः । पूर्वे पूर्वेभ्यो वच एत-दूचुः ॥

आदर्.श–मग्निं चिन्वानाः । पूर्वे विश्व सृजोऽमृताः ।
शतं वर्.ष सहस्राणि । दीक्षिताः सत्र–मासत ॥ **124**

**T.B.3.12.9.3**

तप आसीद् गृहपतिः । ब्रह्म ब्रह्माभवथ् स्वयं ।
सत्यꣳ ह हो तैषामासीत् । यद् विश्वसृज आसत ॥
अमृत–मेभ्य उदगायत् । सहस्रं परिवथ्सरान् ।
भूतꣳ ह प्रस्तो तैषामासीत् । भविष्यत् प्रति चाहरत् ॥
प्राणो अद्ध्वर्यु–रभवत् । इदꣳ सर्वꣳ सिषासतां । **125**

**T.B.3.12.9.4**

अपानो विद्वा–नावृतः । प्रति प्रातिष्ठ–दद्ध्वरे ॥
आर्तवा उपगातारः । सदस्या ऋतवो–ऽभवन् ।
अर्द्धमासाश्च मासाश्च । चमसा–द्ध्वर्यवो–ऽभवन् ॥
अशꣳसद् ब्रह्मण–स्तेजः । अच्छावाको ऽभवद् यशः ।
ऋत–मेषां प्रशास्ता–ऽऽसीत् । यद् विश्व सृज आसत ॥ **126**

**T.B.3.12.9.5**

ऊर्ग्–राजान–मुदवहत् । ध्रुवगोपः सहो–ऽभवत् ।
ओजो–ऽभ्यष्टौद् ग्राव्.ण्णः । यद् विश्व सृज आसत ॥

अपचितिः पोत्रीया-मयजत् । नेष्ट्रीया-मयजत् त्विषिः ।
आग्नीद्ध्राद् विदुषी सत्यं । श्रद्धा हैवा यजथ् स्वयं ॥
इरा पत्नी विश्व सृजां । आकूति-रपिनड्ढविः । **127**

**T.B.3.12.9.6**

इद्ध्मꣳ ह क्षुच् चैभ्य उग्रे । तृष्णा चा वहतामुभे ॥
वागेषाꣳ सुब्रह्मण्या-ऽऽसीत् । छन्दोयोगान्. विजानती ।
कल्पतन्त्राणि तन्वाना-ऽहः । सꣳस्थाश्च सर्वशः ॥
अहोरात्रे पशुपाल्यौ । मुहूर्त्ताः प्रेष्या अभवन् ।
मृत्युस्तद-भव-द्धाता । शमितो ग्रो विशां पतिः ॥ **128**

**T.B.3.12.9.7**

विश्वसृजः प्रथमाः सत्र-मासत । सहस्रसमं प्रसुतेन यन्तः ।
ततो ह जज्ञे भुवनस्य गोपाः । हिरण्मयः शकुनि र्ब्रह्म नाम ॥
येन सूर्य-स्तपति तेजसे-द्धः । पिता पुत्रेण पितृमान्. योनियोनौ ।
नावेदविन्मनुते तं बृहन्तं । सर्वानुभुमात्मानꣳ संपराये ॥
एष नित्यो महिमा ब्राह्मणस्य ।
न कर्मणा वर्द्धते नो कनीयान् । **129**

**T.B.3.12.9.8**

तस्यैवात्मा पदवित्तं ँविदित्वा । न कर्मणा लिप्यते पापकेन ॥

पञ्चपञ्चाशत–स्त्रिवृतः सम्ँवथ्सराः ।

पञ्चपञ्चाशतः पञ्चदशाः । पञ्चपञ्चाशतः सप्तदशाः ।

पञ्चपञ्चाशत एकवि(ग्ं)शाः । विश्वसृजा(ग्ं) सहस्र सम्ँवथ्सरं ॥

एतेन वै विश्वसृज इदं ँविश्व–मसृजन्त ।

यद् विश्व–मसृजन्त । तस्माद् विश्वसृजः ( ) ॥

विश्व–मेना–ननु प्रजायते । ब्रह्मणः सायुज्य(ग्ं) सलोकतां ँयन्ति ।

एतासामेव देवताना(ग्ं) सायुज्यं । सार्ष्टिता(ग्ं) समान लोकतां ँयन्ति ।

य एत–दुपयन्ति । ये चैनत् प्राहुः । येभ्य–श्चैनत् प्राहुः ॥

ओं ॥ **130**

**(शश्व – दासत – सिषासता – मासत – हविष् – पतिः – कनीयान् – तस्माद् विश्वसृजो ऽष्टौ च )**

**॥ हरिः ओं ॥**

**————————————अभिश्रवणमन्त्र पाठ स्समाप्तः—————————**

**"Korvai" (Chain) indicating starting "padam" of all the "Chapteres" in Abisravanam.**

सहस्रशीर्षा– मद्भ्यः–सहस्रशीर्ष– मृतं–कृणुष्व –रक्षोहणः–
सोमायो–शन्तस्त्वा–भक्षेहि–ध्रुवा – ऽस्यग्न उदधे –शिरो–
ऽसावादित्य– संतति–रकवि॒श– इन्द्रो–वैश्वदेवेना– ऽग्नय–
उशन्तस्त्वा–य–मुशन् ह–त॒ ह – यां प्रथमा–मृचां प्राची चतु
र्वि॒शतिः ॥

**Begining and ending "padam" of Abisravanam.**

सहस्रशीर्षा पुरुष – ओं ॥

================